कालप्रकाशमंत्रप्रामाण्यनिरूपणम्

प्रथमाध्यायार्थसंग्रहः

४२११

मंत्राणां पदार्थत्वेन प्रामाण्यं वाक्यार्थे पदार्थानां प्रामाण्याभ्युपगमादिति पार्थसारथिमिश्राः। तस्यार्थ
ः। तर्कपादे उक्तत्वाद्वा वचनाः स्युरिति सूत्रे आचार्यैः। अत्राभिधीयते यद्यप्युक्तिमत्त्वात् तत्र न नः पदार्थानां
तु सत्त्वमिष्टं तद्भावभावतः इति वाक्यार्थप्रतीतौ पदार्थानां करणत्वमुक्तं। दर्शपूर्णमासादिप्रयोगवि
धिषु श्रुतिलिंगादिविनियोज्या मंत्राः पदार्थत्वेन प्रविष्टा वाक्यैकवाक्यतयेति मंत्रविशिष्टां दर्शपूर्णमा
सादिभावनां विदधतो महावाक्यस्य दर्शपूर्णमासादिप्रयोगविधेर्महावाक्यार्थे पदार्थस्थिता मंत्राः प्रमा
णभावं लभंत इति। गुरुचरणास्तु एवं सति ब्रीह्यादिवत्पदार्थविधये वेषां प्रामाण्यं स्यान्न शब्दविधयेति दू
षयित्वा स्मृतिवद्यथार्थत्वलक्षणमेवैषां प्रामाण्यमित्याहुः। महर्षिणामेश्वरस्तु अनधिगतार्थगंतृत्वमा
प्याह प्रपादिस्मृतिलिंगत्वं मंत्राणां वक्ष्यते वयत्र। देवताकस्त्वंनं पद्धमात्रं न तस्माद्यजिश्चयः। मंत्रवर्णाद्य
यद्दोतुः सर्वेषानं वदिष्यते। मे देही सात्मवाहित्वान्मंत्राणां याजमानता। करणानां त्वार्त्विज्यत्वेप्यंगता

बाल० प्र० ध्यफलस्य यत्। स्वामिगतत्वं क्रियार्थस्य कर्तृगतत्वं च वक्ष्यते। मंत्रक्रमानुरोधाच्च ब्राह्मणाक्रमबाधनं। छा
गस्य निश्चयोपश्च पश्चाद्दृष्टमंत्रगः। तदर्थपरतायां स्यात्सर्वं नैवान्यथा भवेत् सर्वसाधारणत्वेन वि
चारस्य प्रयोजनं। कर्मकाले तु संधेयो मंत्रार्थोर्थपरत्वतः। इषेत्वादिषु चोच्चार्य छिन्मीसादिस्तर्पये। अ
सावि सादिशात्वस्य स्थाने यज्ञादिनामवा। सिद्धांते मंत्रलोपश्च प्रकाशाभाव इष्यते। यथाम्नातप्रयोगस्तु
केवलोर्थो विवक्षणो। यदि त्वर्थपरत्वेपि नैतावत्स्यात्प्रयोजनं। ततो धर्मप्रमाणत्वं मंत्राणां नैव सिध्य।
ति। लवनादिस्वरूपस्य प्रकाशत्वे हि धर्मता। समीहितांगताभावान्न कथंचित्प्रतीयते। अपूर्वसाध
नत्वेन यद्यप्येतन्न काश्यते। विधिप्रामाण्यानुवादत्वान्न तथापि प्रमाणता। अपूर्वसाधनत्वात्तु लवना
दे समीहिते। आत्मनोंगत्वबोधेन मंत्रः प्रामाण्यमश्नुते। अश्नुत इत्ययागादिकल्पनाच्च प्रमाणतेति राम०
तदत्रापि गुरुचरणोक्तेः याथार्थ्यलक्षणो प्रामाण्यसोमेश्वरोक्ते सर्वमंत्रसाधारणो मंत्रार्थानुसंधान १

विषयेप्रामाण्येजपमंत्रेष्वप्यानिरूपोदोषोस्त्येव। अविवक्षितार्थकमुच्चारणमात्रमेवहिजपः। तदुक्तंहा
रदत्तेन। यत्रसंतमप्यर्थमविवक्षित्वोच्चारणमात्रमदृष्टार्थंक्रियतेयथावेद्मवीमच्चमरूद्रेतिसजपइति।
तत्रसंतमपीत्यपिशब्दात्क्वचिदर्थाभावोपिप्रतीयतेनतस्मात्ततःकृतोर्थयाथार्थ्यकृतोवानुसंधानंइतिके
अ॰ चित्। तन्न। जपमंत्राणामपिसर्वांश्च वः सर्वाणियजूंषिसर्वाणिसामानिवाचस्तोमेपारिप्लवंशंसतीति
गुणगुणिसंबंधकीर्तनात्मकेशास्त्रेविनियोगाद्गुणगुणिसंबंधरूपेर्थेतात्पर्यमस्त्येव। तेनतेषांमंत्रार्था
नुसंधानविषयेप्रामाण्यंसंभवत्येव। याथार्थ्यंतुतत्राप्याप्रमेव। ननुतत्रापिलक्षणयायाथार्थ्यंवाच्य
मेव। अतएवार्थवादाधिकरणेक्षमएवाग्नेर्दिवादहृदश्चइत्यादिषुयथार्थेषुगुणवादस्त्विस्तुपक्रम्यइत्याभ्य
पत्यादिसादित्यत्रैरूपचारादेवयाथार्थ्यमुक्तमितिचेत्। नातेष्टदाहरणेषुसंभवमात्रेणतदुक्तंनत्वयं
नियमः। अस्तुतापिगुणेनासतोपिगुणिनःस्तुतिर्भवत्यतिसंभवात्। अतएवार्थवादाधिकरणएव

वा॰ल॰प्र॰ प्रजापतिरात्मनोवपामुदखिददित्यत्रमहाभूतविषयत्वेनभाष्योक्तंव्याख्यानमेवंतुल्यमित्वमेवह्येपत
इतिदूषयित्वार्थवादादिस्तुतिकांस्तिष्टिप्रलयप्रतीतिमात्रेणस्ततोपिप्रजापतेरस्मतापिगुणोनस्तुतिरंगी
कृता।तस्मात्स्तोत्रमंत्रेषुयाथार्थ्यमस्त्यामसमेव।मंत्रार्थानुसंधानविषयंतुप्रामाण्यंसंभवतीतितदेवयु
क्तमितिसिद्धं।नन्वेवमपिसाममंत्राणांकथंशब्दविधयाप्रामाण्यमितिचेत्।उच्यते।तेषामशब्दतयाश
ब्दानुग्राहकत्वाच्छब्दप्रमाजनकसामर्थ्यंतद्गतत्वेनशब्दप्रमाणांतर्भावात्।साचेयमपूर्वकेषुप्रजा
पतेर्हृदयादिषुविधानसंभवति~~अनन्यापि~~व्याप्नोतीतीतोहशंपदार्थविधयाप्रामाण्यंमिश्रेस्त्कं।तानि
चान्वकानिपंचत्रिंशत्सामानि।अर्कग्रीवमेकं।पंचानुगानमध्येसामत्रयं।हाउहोवासामेकं।हाउवाक्।
सामानित्रीणि।वाचोव्रमेद्वे।सत्रस्यर्धिएकं।परमेष्ठिसामैकं।आंगिरसव्रतमेकं।इलांदमेकं।सधस्थ राम॰
मेकं।देवव्रतानित्रीणि।कउपपग्रीवमेकं।प्रजापतेर्हृदयमेकं।अनडुद्व्रतमेकं।महादिवाकीर्त्यानिन २

वसत्वाभ्रंतमेकं।घर्मचोचनमेकं।आदित्यआत्मेकं।इंद्रोचनमेकं।इड्डानांसंस्कारएकमिति॥ ॥इतिश्री
मत्तद्वाक्यप्रमाणपारावारपारीणधुरीणमीमांसाद्वैतसाम्राज्यधुरंधरश्रीभट्टनारायणात्मजभट्टशं
करकृतमीमांसाबालप्रकाशेमंत्रप्रामाण्यनिरूपणं॥ ॥इतिप्रथमाध्यायार्थसंग्रहः॥ ॥

3



बाल० म्र०



४०

एम्र०
३